A.C. Joshi Library
P.U. Chandigarh

MSS No. 410 Subject Religion

Name of MSS Gautma Dharama Sutra

Author

Period Folios 34

Script Devnagiri Source Curator, G.O.M.L, Madras

Missing Folios

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative




CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

Form 13.

PANJAB

U

Class

Auth

Sans. Ms. 294.1 G275	गौतमधर्मसूत्र : अनुचित्रक प्रतिलिपि
410-Ms.	१७ : कार्ड (३४ आचित्रमें ; ल० अं० २० पं० प्र० पृ०
	ह० लि० गवर्नमैण्ट ओरिएण्टल मैनुस्क्रिप्ट्स , मद्रास, ह० लि० ग्रंथ नं० : D-1200 का आचित्र ॥
Panj. Ms.	

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

Gautma Dharma

NO.
G.K. VALE & CO.,
MOUNT ROAD, MADRAS.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

GOUTAMA DHARMA
(5-3-12)

D 1200 Skt.

No. of Prints — 34.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

P. U. L.

Form 10

Date Loaned

This book was taken from the Library on the date last marked.

It can be retained for the period permitted by the rules governing the class of your membership.

A fine of one anna will be charged for each day the volume is kept overtime.

19.10.54

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गौ०म०

१

॥श्रीगणेशायनमः वेदोधर्ममूलंतद्विदांचस्मृ
तिशीलेदृष्टोधर्मव्यतिक्रमस्साहसंचमहतांनतुदृ
ष्टार्थेऽवरदौर्बल्यात्तुल्यबलविरोधेविकल्पउपनय
नंब्राह्मणस्याष्टमेपंचमेवाकाम्यंगर्भादिसंख्याव
र्षाणांतद्द्वितीयंजन्मतद्यस्मात्सआचार्योवेदानुवच
नाच्चैकादशद्वादशयोःक्षत्रियवैश्ययोराषोडशाद्ब्रा
ह्मणस्यापतितासावित्रिद्वाविंशतेराजन्यस्याद्व्यधि
कायावैश्यस्यमौंजीज्यामौर्वीसौत्र्योमेखला
क्रमेणकृष्णरुरुवस्ताजिनानिवासांसिशाणक्षौमची
रकुतपास्सर्वेषांकार्पासंचाविकृतंकाषायमप्येकेवा
र्क्षंब्राह्मणस्यमांजिष्टहारिद्रेइतरयोर्बैल्वपालाशौब्रा
ह्मदंडावाश्वत्थपैलवौशेषेयज्ञियोवासर्वेषामपीडि
तायूपवक्राःसशल्कामूर्धललाटनासाग्रप्रमाणा
मुंडजटिलशिखाजटाश्चद्रव्यहस्तउच्छिष्टोनिधा
याचामेद्रव्यशुद्धिःपरिमार्जनप्रदाहतक्षणनिर्णे
जनानितैजसमार्त्तिकदारवतांतवानांतैजसवदुप
लमणिशंखशुक्तीनांदारुवदस्थिभूम्योरावपनंचभू
मेश्चेलवद्रज्जुविदलचर्मणामुत्सर्गोवासंतोपहतानां
प्राङ्मुखोदङ्मुखोवाशौचमारभेतशुचौदेशआसीनो १
दक्षिणंबाहुंजान्वंतराकृत्वायज्ञोपवीसामणीप्रक्षा

410-ms.



CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्तद्भार्यापुत्रेषुचैवं नोच्छिष्टाशनस्नापनप्रसाधनपाद
प्रक्षालनोन्मर्दनोपसंग्रहणानि विप्रोष्योपसंग्रहणंगु
रुभार्याणांनैकेयुवतीनांव्यवहारप्राप्तेनसार्ववर्णिकंभै
क्षचरणमभिशस्तपतितवर्जं आदिमध्यांतेषुभवच्छब्दः
प्रयोज्योवर्णानुपूर्वेण आचार्यज्ञातिगुरुस्वेष्वलाभेऽन्य
त्रंतेषांपूर्वंपरिहरेन्निवेद्यगुरवेऽनुज्ञातोभुंजीत असन्नि
धौतद्भार्यापुत्रसब्रह्मचारिसद्भ्यः वाग्यतस्तृप्यन्नलो
लुप्यमानः सन्निधायोदकं शिष्यशिष्टिरवधेनाशक्तौ
रज्जुवेणुविदलाभ्यांतनुभ्यामन्येनघ्नन्राज्ञाशास्यः द्वा
दशवर्षाण्येकैकवेदेब्रह्मचर्यंचरेत् प्रतिद्वादशसर्वेषुग्र
हणांतंवाविद्यांतेगुरुरर्थेननिमंत्र्यस्ततः कृत्वानुज्ञातस्य
स्नानं आचार्यश्रेष्ठोगुरूणांमातेत्येकेमातेत्येके इतिगौत
मीयेद्वितीयोऽध्यायः २ तस्याश्रमविकल्पमेकेब्रुवंते
ब्रह्मचारीगृहस्थोभिक्षुर्वैखानसस्तेषांगृहस्थोयोनिरप्र
जननत्वादितरेषां तत्रोक्तंब्रह्मचारिणआचार्याधीनत्व
मान्त्यंगुरोः कर्मशेषेणजपेत् गुर्वभावेतदपत्येवृत्तिस्तद
भावेवृद्धेसब्रह्मचारिण्यग्नौवा एवंवृत्तोब्रह्मलोकमवाप्नो
तिजितेंद्रियः उत्तरेषांचैतदविरोधि अनिचयोभिक्षुरू
र्ध्वरेताः ध्रुवशीलोवर्षासुभिक्षार्थीग्राममीयात् जघन्य
मनिवृत्तंचरेत् निवृत्ताशीर्वाक्चक्षुः कर्मसंयुतः कौपीना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गौ० म०
२

भवतिनास्याचमनोकल्योविद्यतेऽन्यत्रापमार्जनप्रधा
वनावोक्षणेभ्योनतदुपस्पर्शनादाशौचंनत्वेवैनमग्नि
रुवनबलिहरणयोर्नियुञ्ज्यान्नब्रह्माभिव्याहारयेदन्य
त्रस्वधानिनयनादुपनयनादिर्नियमउक्तंब्रह्मचर्य
मग्नींधनभैक्षचरणेसत्यवचनमपामुपस्पर्शनं एके
गोदानादिबहिःसंध्यार्थंचतिष्ठेत्पूर्वामासीतोत्तरांस
ज्योतिष्याज्योतिषोदर्शनाद्वाग्यतः नादित्यमीक्षेत
वर्जयेन्मधुमांसगंधमाल्यदिवास्वप्नांजनाभ्यंजनयो
नोयानच्छत्रकामक्रोधलोभमोहवादवादनस्नानदं
तधावनहर्षनृत्यगीतपरिवादभयानि गुरुदर्शनेक
र्णप्रावृतावसिक्थकायाश्रयणपादप्रसारणानि निष्ठी
वितहसितविजृंभितावस्फोटनानि स्त्रीप्रेक्षणालंब
नेमैथुनशंकायांद्यूतंहीनवर्णसेवादत्तादानंहिंसां
आचार्यतत्पुत्रस्त्रीदीक्षितनामानिशुक्तावाचोमद्यन्ति
त्यंब्राह्मणः अधःशय्याशायीपूर्वोत्थायीजघन्यसंवे
शीवाग्बाहूदरसंयुतः नामगोत्रेगुरोःसमानतो
निर्दिशेत् अर्चितेश्रेयसिचैवंशय्यासनस्थानानिवि
हायप्रतिश्रवणमभिक्रमणंवचनाददृष्टेनाधस्थाना
सनतिर्यग्वातसेवायांगुरुदर्शनेचोत्तिष्ठेत् गच्छंतमनु
व्रजेत्कर्मविज्ञाप्याख्यायाहूताध्यायीयुक्तःप्रियहितयो २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्सवाग्यतो हृदयस्पृशस्त्रिश्चतुर्वीप आचामेद्विः प
रिमृज्यपादौ चाभ्युक्षेत्खानि चोपस्पृशेच्छीर्षण्यानि
मूर्धनि च दद्यात्सुप्त्वा भुक्त्वा क्षुत्वा च पुनर्दंतश्लिष्टेषु
दंतवदन्यत्र जिह्वाभिमर्शनात्प्राक्च्युतेरित्येके च्युते
ष्वास्राववद्विद्यान्निगरन्नेव तच्छुचिर्न मुख्या विप्रुषो
च्छिष्टं कुर्वंति न चेदंगे निपतंति लेपगंधापकर्षणे शौ
चममेध्यस्य तदद्भिः पूर्वं मृदा च मूत्रपुरीषरेतोविस्रं
सनाभ्यवहारसंयोगे च यत्र चाम्नायो विदध्यात्पा
णिना सव्यमुपसंगृह्यानंगुष्ठमधीहि भो इत्यामंत्रयेत
गुरुं तत्र चक्षुर्मनःप्राणोपस्पर्शनं दर्भैः प्राणायामास्त्र
यः पंचदशमात्राः प्राक्कूलेष्वासनं चोपवीत्या हृतयः
पंचसमांताः गुरोः पादोपसंग्रहणं प्रातर्ब्रह्मानुवच
ने चाद्यंतयोः अनुज्ञात उपविशेत् प्राङ्मुखो दक्षिण
तः शिष्य उदङ्मुखो वा सावित्री चानुवचनमादितो ब्र
ह्मण आदाने ॐकारोऽन्यत्रापि अंतरागमने पुनरुपसद
नं श्वनकुलसर्पमंडूकमार्जाराणां त्र्यहमुपवासो वि
प्रवासश्च प्राणायामा घृतप्राशनं चेतरेषां श्मशाना
भ्यध्ययने चैवं इति श्रीगौतमी
ये धर्मशास्त्रे प्रथमोऽध्यायः १ प्रागुपनयनात्काम
चारवादभक्षोऽहुताद्ब्रह्मचारी यथोपपातमूत्रपुरीषो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

च्छादनार्थं वासो बिभृयात् प्रहीणमेके निर्णिज्यनावि
प्रयुक्तं ओषधिवनस्पतीनामंगमुपाददीत न द्वितीयामप
र्तुरात्रिं ग्रामे वसेत् मुंडः शिखी वा वर्जयेद्बीजवधं स
मो भूतेषु हिंसानुग्रहयोरनारंभी वैखानसो वने मूल
फलाशी तपःशीलः श्रावणकेनाग्निमाधायाग्राम्य
भोजी देवपितृमनुष्यभूतर्षिपूजकः सर्वातिथिप्रतिषि
द्धवर्जं भैक्षमप्युपयुंजीत न फालकृष्टमधितिष्ठेत् ग्रा
मं च न प्रविशेज्जटिलश्चीराजिनवासाः नातिसांवत्स
रं भुंजीत एकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्य
गार्हस्थ्यस्य इति गौतमीये तृतीयोऽध्यायः ३ पुराणं
मानवो धर्मः सांगो वेदश्चिकित्सितं आज्ञासिद्धानि
चत्वारि न हंतव्यानि हेतुभिः गृहस्थः सदृशीं भार्यां
विंदेतानन्यपूर्वां यवीयसीं असमानप्रवरैर्विवाहः ऊ
र्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः पंच
मात् ब्राह्मो विद्याचारित्रबंधुशीलसंपन्नाय दद्यादाच्छा
द्यालंकृतां संयोगमंत्रः प्राजापत्ये सह धर्मश्चर्यता
मिति आर्षे गोमिथुनं कन्यावते दद्यात् अंतर्वेद्यृत्वि
जे दानं दैवः अलंकृत्येच्छंत्याः स्वयंसंयोगो गांधर्वः वित्ते ३
नानतिः स्त्रीमतामासुरः प्रसह्यादानाद्राक्षसः असंवि
ज्ञातोपसंगमनात्पैशाचः चत्वारो धर्म्याः प्रथमाः प

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ङ्खेके अनुलोमानंतरैकांतरद्व्यंतरासु जाताः सव
र्णांबष्ठोग्रनिषाददौष्यंतपारशवाः प्रतिलोमाः सूत
मागधायोगवक्षत्तवैदेहकचंडालाः ब्राह्मण्यजीजनत्
पुत्रान्वर्णेभ्य आनुपूर्व्याद्ब्राह्मणः सूतमागधचांडाला
न् तेभ्य एव क्षत्रिया मूर्धावसिक्तक्षत्रियधीवरपुल्कसा
न् तेभ्य एव वैश्या भृज्जकंटकमाहिष्यवैश्यवैदेहका
न् पारशवयवनकरणशूद्रान् शूद्रेत्येके वर्णांतरगमनमु
त्कर्षापकर्षाभ्यां सप्तमेन पंचमेनाचार्याः सृष्टांतरजा
तानां च प्रतिलोमास्तु धर्महीनाः शूद्रायां च असमानायां
च शूद्रात्पतितवृत्तिः अंत्यः पापिष्ठः पुनंति साधवः
पुत्रास्त्रिपौरुषानार्षाद्दशदैवाद्दशप्राजापत्याद्दश पू
र्वान्दशावरानात्मानं च ब्राह्मीपुत्रो ब्राह्मीपुत्रः इति गौ
तमीये चतुर्थोऽध्यायः ४ अतोऽपेयात्सर्वेषां प्रति
षिद्धवर्जं देवपितृमनुष्यभूतर्षिपूजको नित्यस्वाध्यायः
पितृभ्यश्चोदकदानं यथोत्साहमन्यद्भार्यादिरग्निर्दाया
दिर्वा तस्मिन्गृह्याणि देवपितृमनुष्ययज्ञाः स्वाध्याय
श्च बलिकर्माग्नावग्निर्धन्वंतरिर्विश्वेदेवाः प्रजापतिः स्वि
ष्टकृदिति होमो दिग्देवताभ्यश्च यथास्वं द्वारेषु मरुद्भ्यो गृ
हदेवताभ्यः प्रविश्य ब्रह्मणे मध्येऽद्भ्य उदकुंभ आकाशा ४
येत्यंतरिक्षे नक्तंचरेभ्यश्च सायं स्वस्तिवाच्य भिक्षादा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गौ॰ध॰
५

दानमप्यपूर्वंतुददातिषुचैवंधर्मेषु समद्विगुणसहस्रानंसा
निफलान्यब्राह्मणब्राह्मणश्रोत्रियवेदपारगेभ्यः गुर्व[illegible]नि
वेशोषधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनाध्वसंयोगाविश्व
जितेषुद्रव्यसंविभागोवहिर्वेदिभिक्षमाणेषुकृतान्नमित
रेषु प्रतिश्रुत्याप्यधर्मसंयुक्तायनदद्यात ऊर्द्धहृष्टभीता
र्त्तलुब्धबालस्थविरमूढमत्तोन्मत्तवाक्यान्यनृतान्यपात
कानिभोजयेत्पूर्वमतिथिकुमारव्याधितगर्भिणीसुवासि
नीस्थविरानजघन्यांश्च आचार्यपितृसखीनांतुनिवद्य
वचनक्रिया ऋत्विगाचार्यश्वशुरपितृव्यमातुलानामुप
स्थानेमधुपर्कः संवत्सरेपुनः यज्ञविवाहयोर
र्वाक्राज्ञश्चश्रोत्रियस्याश्रोत्रियस्याश्रोत्रियस्यासनोदके
श्रोत्रियस्यतुपाद्यमर्घ्यमन्नविशेषांश्चप्रकारयेन्नित्यंवा
संस्कारविशिष्टंमध्यतोन्नदानमवैद्येसाधुवृत्तेविपरीते
तुतृणोदकभूमिः स्वागतमंततः पूज्यानस्याशय्या
प्यासनावसथानुव्रज्योपासनानिसदृक्श्रेयसोस्समानम्
ल्पशोपिहीने असमानग्रामोऽतिथिरेकरात्रिकोधिवृक्ष
सूर्योपस्थायीकुशलानामयारोग्याणामनुप्रश्नोसंत्यशूद्र
स्याब्राह्मणस्यानतिथिरब्राह्मणोयज्ञेसंवृतश्चेत्भोजनंतु
क्षत्रियस्योर्द्ध्वंब्राह्मणेभ्योऽमानभृत्यैः सहानृशंसार्थमा ४
नृशंसार्थं इतिगौतमीयेपंचमोऽध्यायः ५ मादोपसं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गौ

ग्रहणंगुरुसमवायेन्वहमभिगम्यतुविप्रोष्यमातृपितृत
द्बंधूनांपूर्वजानांविद्यागुरूणांचसन्निपातेपरस्यस्वनाम
प्रोच्यायमहमित्यभिवादोज्ञसमवायेस्त्रीपुंयोगेऽभिवाद
तोऽनियममेकेनाविप्रोष्यस्त्रीणाममातृपितृव्यभार्याभ
गिनीनांनोपसंग्रहणंभ्रातृभार्याणांश्वश्र्वाश्च ऋत्विक्
श्वशुरपितृव्यमातुलानांतुयवीयसांप्रत्युत्थानमनभिवा
द्यास्तथान्यः पूर्वः पौरोऽशीतिकावरः शूद्रोऽप्यपत्य
समेनावरोप्यार्यः शूद्रेणनामचास्यवर्जयेद्राज्ञश्चाजपः
प्रेष्योभोभवन्नितिवयस्यः समानेहनिजातोदशवर्षवृ
द्धः पौरः पंचभिः कलाभरः श्रोत्रियश्चारणस्त्रिभिः रा
जन्योवैश्यकर्मविद्याहीनोदीक्षितस्यप्राक्क्रयात् वित्त
बंधुकर्मजातिविद्यावयांसिमानिपरबलीयांसि श्रुतंतु
सर्वेभ्योगरीयस्तन्मूलत्वाद्धर्मस्यश्रुतेश्चचक्रिदशमीस्था
नुग्राह्यवधूस्नातकराजभ्यः पथोदानंराज्ञातुश्रोत्रियाय
श्रोत्रियाय इतिगौतमीयेषष्ठोऽध्यायः ६ आपत्क
ल्पोब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनंशुश्रूषा
समाप्तेब्राह्मणोगुरुर्याजनाध्यापनप्रतिग्रहाः सर्वेषां
पूर्वः पूर्वोगुरुः तदलाभेक्षत्रवृत्तिस्तदलाभेवैश्यवृत्तिः
तस्यापण्यंगंधरसकृतान्नतिलशाणक्षौमाजिनानिरक्त
निर्णिक्तेवाससीक्षीरंचसविकारंमूलफलपुष्पौषधम
धुमांसतृणोदकापथ्यानिपशवश्चहिंसासंयोगेपुरुष

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वशा कुमारी वेहतश्चानिसंभर्मि व्रीहीयवाजाव्यश्वऋषभ
धेन्वनडुहश्चैके नियमस्तु रसानां रसैः पशूनां च न लवण
कृतान्नयोस्तिलानां च समेनामेन तु पक्वस्य संप्रत्यर्थे सर्वे
था तु वृत्तिरशक्तावशूद्रेण तदप्येके प्राणसंशये तद्वर्ण
संकरोऽभक्ष्यनियमस्तु प्राणसंशये ब्राह्मणोपि शस्त्रमा
ददीत राजन्यो वैश्यकर्म वैश्यकर्म इति गौतमीये सप्त
मोऽध्यायः ७ द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रु
तस्तयोश्चतुर्विधस्य मनुष्यजातस्यांतःसंज्ञानां चलनप
तनसर्पणानामायत्तं जीवनं प्रसूतिरक्षणमसंकरो ध
र्मः स एष बहुश्रुतो भवति लोकवेदवेदांगविद्वाकोवा
क्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चत्वारिंशता
संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा सामय
चारिकेष्वभिविनीतः षड्भिः परिहार्यो राज्ञावध्यश्चाब
ध्यश्चादंड्यश्चाबहिष्कार्यश्चापरिवाद्यश्चापरिहार्य
श्चेति गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनाम
करणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्ना
नं सहधर्मचारिणीसंयोगः पंचानां यज्ञानामनुष्ठानं
देवपितृमनुष्यभूतब्रह्मणामेतेषां चाष्टका पार्वणश्रा
द्धश्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञ
संस्था अग्न्याधेयमग्निहोत्रदर्शपूर्णमासावाग्रयणं चा ५
तुर्मास्यनिरूढपशुबंधसौत्रामणीति सप्त हविर्यज्ञसं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्ता अग्निष्टोमो त्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो
ऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था इत्येते चत्वारिं
शत्संस्काराः अथाष्टावात्मगुणा दया सर्वभूतेषु क्षांति
रनसूया शौचमनायासो मंगलमकार्पण्यमस्पृहेति
यस्यैते चत्वारिंशत् संस्कारा न चाष्टावात्मगुणा न स ब्र
ह्मणः सायुज्यं सालोक्यं च गच्छति यस्य तु खलु संस्का
राणामेकदेशोप्यष्टावात्मगुणा अथ स ब्रह्मणः सायु
ज्यं सालोक्यं च गच्छति गच्छति इति गौतमीये अष्ट
मोऽध्यायः ८ स विधिपूर्वं स्नात्वा भार्यामधिगम्य य
थोक्तान् गृहस्थधर्मान्प्रयुंजान इमानि व्रतान्यनुकर्षे
न्नित्यं शुचिः सुगंधः स्नानशीलः सति विभवे न जीर्ण
मलवद्वासाः स्यान्न रक्तमुल्वणमन्यधृतं वा वासो बि
भृयान्न स्रगुपानहौ निर्णिक्तमशक्तौ न रूढश्मश्रुरक
स्मान्नाग्निमपश्च युगपद्धारयेन्नांजलिना पिबेन्न
तिष्ठन्नुद्धृतोदकेनाचामेन्न शूद्राशुच्येकपाण्यावर्जि
तेन न वाय्वग्निविप्रादित्यापो देवता गाश्च प्रतिपश्य
न्वा मूत्रपुरीषामेध्यान्युदस्येन्नैव देवताः प्रति पादौ
प्रसारयेन्न पर्णलोष्टाश्मभिर्मूत्रपुरीषापकर्षणं कु
र्यान्न भस्मकेशतुषकपालामेध्यान्यधितिष्ठेन्न म्लेच्छाशु
च्यधार्मिकैस्सह संभाषेत संभाष्य पुण्यकृतो मनसा ६
ध्यायेद्ब्राह्मणेन वा सह संभाषेत अधेनुं धेनुभव्येति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ब्रूयाद्भद्रंभद्रमितिकपालंभगालमितिमणिधनुरिती
न्द्रधनुःगांधयंतींपरस्मैनाचक्षीतनचैनांवारयेन्नमिथु
नीभूत्वाशौचंप्रतिविलंबेतनचतस्मिंछयनेस्वाध्याय
मधीयीतनचापररात्रमधीत्यपुनःप्रतिसंविशेन्नाक
ल्यांनारीमभिरमयेन्नरजस्वलांनचैनांश्लिष्येन्नकन्या
मग्निमुखोपधमनविगृह्यवादबहिर्गंधमाल्यधारण
पापीयसावलेखनभार्यासहभोजनांजंत्यवेक्षणकुद्वा
रप्रवेशनपादपादधावनासंदिस्थसभोजननदीबाहुत
रणवृक्षविषमारोहणावरोहणप्राणव्यवस्थानानिचव
र्जयेन्नसंदिग्धांनावमधिरोहेत्सर्वतएवात्मानंगोपायेन्न
प्रावृत्यशिरोहनिपर्यटेत्प्रावृत्यतुरात्रौमूत्रोच्चारेचनभू
मावनंतर्धायनाराच्चावसथान्नभस्मकरीषकृष्टच्छाया
पथिकाम्येषुउभेमूत्रपुरीषेदिवाकुर्यादुदङ्मुखःसंध्य
योश्चरात्रौतुदक्षिणामुखःपालाशमासनंपादुकेदंत
धावनमितिचवर्जयेत्सोपानत्कश्चाशनासनशयना
भिवादननमस्कारान्वर्जयेन्नपूर्वाह्णमध्यंदिनापरा
ह्णानफलान्कुर्याद्यथाशक्तिधर्मार्थकामेभ्यस्तेषुचधर्मो
त्तरःस्यान्ननग्नांपरयोषितमीक्षेतनपदासनमाकर्षेन्न
शिश्नोदरपाणिपादवाक्चक्षुश्चापलानिकुर्याच्छेदनभे
दनविलिखनविमर्दनावस्फोटनानिनाकस्मात्कुर्यान्नो
परिवत्सतंत्रींगच्छेन्नकुलंकुलःस्यान्नयज्ञमवृतोगच्छेद्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शीनायतुकामंनभक्ष्यानुत्संगेभक्षयेन्नरात्रौप्रेष्याहृत
मुद्धृतस्नेहविलपनपिण्याकमथितप्रभृतीनिचात्तवी
र्याणिनाश्नीयात्सायंप्रातस्त्वन्नमभिपूजितमनिंदन्भुं
जीतनकदाचिद्रात्रौनग्नःस्वपेत्स्नायाद्वायच्चात्मवंतोवृ
द्धाःसम्यग्विनीतादंभलोभमोहवियुक्तावेदविदआचक्ष
तेतत्समाचरेद्योगक्षेमार्थमीश्वरमधिगच्छेन्नान्यमन्यत्र
देवगुरुधार्मिकेभ्यःप्रभूतैधोदकयवसकुशमाल्योपनि
ष्क्रमणमार्यजनभूयिष्ठमनलससमृद्धंधार्मिकाधिष्ठितं
निकेतमावसितुंयतेतप्रशस्तमंगल्यदेवतायतनचतुष्प
थादीन्प्रदक्षिणमावर्तेतमनसावातत्समग्रमाचारमनु
पालयेदापत्कल्पःसत्यधर्माआर्यवृत्तःशिष्टाध्यापकःशौ
चशिष्टःश्रुतिनिरतःस्यान्नित्यमहिंस्रोमृदुर्दृढकारीद
मदानशीलएवमाचारोमातापितरौपूर्वापरान्संबंधान
दुरितेभ्योमोक्षयिष्यन्स्नातकःशश्वद्ब्रह्मलोकान्नच्यवते
नच्यवते इतिगौतमीयेनवमोऽध्यायः ९ द्विजातीना
मध्ययनमिज्यादानंब्राह्मणस्याधिकाःप्रवचनयाज
नप्रतिग्रहाःपूर्वेषुनियमस्त्वाचार्यज्ञातिप्रियगुरुधन
विद्याविनिमयेषुब्राह्मणःसंप्रदानमन्यत्रयथोक्तात्कृ
षिवाणिज्येवास्वयंकृतेकुसीदंचराज्ञोऽधिकंरक्षणंसर्व
भूतानांन्याय्यदंडत्वंबिभृयाद्ब्राह्मणान्श्रोत्रियान्निरुत्सा ७
हांश्चाब्राह्मणानकरांश्चोपकुर्वाणांश्चयोगश्चविजयेभ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

येविशेषेणचर्याचरथधनुर्भ्यांसंग्रामेसंस्थानमनिवृ
त्तिश्चनदोषोहिंसायामाहवेऽन्यत्रव्यश्वसारथ्यायुध
कृतांजलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारू
ढदूतगोब्राह्मणवादिभ्यःक्षत्रियश्चेदन्यस्तमुपजीवेत्त
द्वृत्तिःस्याज्जेतालभेतसांग्रामिकंवित्तंवाहनंतुराज्ञ
उद्धारश्चापृथक्जयेऽन्यत्तुयथार्हंभाजयेद्राजाराज्ञेब
लिदानंकर्षकैःदशममष्टमंषष्ठंवापशुहिरण्ययोरप्ये
केपंचाशद्भागंविंशतिभागःशुल्कःपण्येमूलफलपु
ष्पौषधमधुमांसतृणेंधनानांषाष्ठ्यंतद्रक्षणधर्मित्वा
त्तेषुतुनित्ययुक्तःस्यादधिकेनवृत्तिःशिल्पिनोमासि
मास्येकैककर्मकुर्युरेतेनात्मोपजीविनोव्याख्यातानौ
वश्चक्रीवंतश्चभक्तंतेभ्योदद्यात्पण्यंवणिग्भिरर्घापचये
नदेयंप्रनष्टमस्वामिकमधिगम्यराज्ञेप्रब्रूयुर्विख्याप्य
संवत्सरंराज्ञारक्ष्यमूर्ध्वमधिगंतुश्चतुर्थंराज्ञःशेषःस्वा
मीरिक्थक्रयसंविभागपरिग्रहाधिगमेषुब्राह्मणस्या
धिकंलब्धंक्षत्रियस्यविजितंनिर्विष्टंवैश्यशूद्रयोर्निध्य
धिगमोराजधनंनब्राह्मणस्याभिरूपस्याब्राह्मणोव्या
तःषष्ठंलभेतेत्येकेचौरहृतमुपजित्ययथास्थानंगमये
त्कोशाद्वादद्याद्रक्ष्यंबालधनमाव्यवहारप्रापणात्समा
वृत्तेर्वावैश्यस्याधिकंकृषिवणिक्पाशुपाल्यंकुसीदंशू ७
द्रश्चतुर्थोवर्णएकजातिस्तस्यापिसत्यमक्रोधःशौचमा

University Chandigarh

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चमनार्थेपाणिपादप्रक्षालनमेवैकेश्राद्धकर्मभृत्यभरणं
स्वदारवृत्तिः परिचर्याचोत्तरेषांतेभ्योवृत्तिंलिप्सेतजीर्ण
मुपानच्छत्रवासःकूर्चान्युच्छिष्टाशनंशिल्पवृत्तिश्चयं
चार्यमाश्रितोभर्तव्यस्तेनक्षीणोपितेनचोत्तरस्तदर्थोस्य
निचयः स्यादनुज्ञातोऽस्यनमस्कारोमंत्रः पाकयज्ञैः
स्वयंयजेतेत्येकेसर्वेचोत्तरोत्तरंपरिचरेयुरार्यानार्ययो
र्व्यतिक्षेपेकर्मणःसाम्यंसाम्यं इतिगौतमीयेदशमोऽध्या
यः १० राजासर्वस्येष्टेब्राह्मणवर्जंसाधुकारीस्यात्साधु
वादीत्रय्यामान्वीक्षक्यांचाभिविनीतः शुचिर्जितेंद्रियोगु
णवत्सहायोपायसंपन्नस्समः प्रजासुस्याद्धितंचासां
कुर्वीततमुपर्यासीनमधस्तादुपासीरन्नन्येब्राह्मणेभ्य
स्तेप्येनंमन्येरन्वर्णानाश्रमांश्चन्यायतोऽभिरक्षेच्चल
तश्चैनान्स्वधर्मेस्थापयेद्धर्मस्यह्यंशभाक्भवतीतिविज्ञा
यतेब्राह्मणंचपुरोदधीतविद्याभिजनवाग्रूपवयःशी
लसंपन्नंन्यायवृत्तंतपस्विनंतत्प्रसूतःकर्माणिकुर्वी
तब्रह्मप्रसूतंहिक्षत्रमृध्यतेनव्यथतइतिचविज्ञायते
यानिचदैवोत्पातचिंतकाः प्रब्रूयुस्तान्याद्रियेततदधी
नमपिह्येकेयोगक्षेमंप्रतिजानतेशांतिपुण्याहस्वस्त्य
यनायुष्यमंगलसंयुक्तान्याभ्युदयिकानिविद्वेषिणसं
वननमभिचारद्विषद्व्यृद्धिसंयुक्तानिचशालाग्नौकुर्या
द्यथोक्तमृत्विजोऽन्यानितस्यव्यवहारोवेदोधर्मशास्त्रा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एयंगान्युपवेदाःपुराणंदेशजातिकुलधर्माश्चाम्नायैर
विरुद्धाःप्रमाणंकृषिवणिक्पशुपाल्यकुसीदकारवःस्वे
स्वेवर्गेतेभ्योयथाधिकारमर्थान्प्रत्यवहृत्यधर्मव्यवस्थान्या
याधिगमेतर्कोऽभ्युपायस्तेनाभ्यूह्ययथास्थानंगमयेद्विप्र
तिपत्तौत्रयीविद्यावृद्धेभ्यःप्रत्यवहृत्यनिष्ठांगमयेत्तथाह्य
स्यनिश्रेयसंभवतिब्रह्मक्षत्रेणसंप्रवृत्तंदेवपितृमनुष्या
न्धारयतीतिविज्ञायतेदंडोदमनादित्याहुस्तेनादांतान्द
मयेद्वर्णाश्रमाश्चस्वकर्मनिष्ठाःप्रेत्यकर्मफलमनुभूय
ततःशेषेणविशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्त
वित्तसुखमेधसोजन्मप्रतिपद्यंतेविष्वंचोविपरीतानश्यं
ति तानाचार्योपदेशोदंडश्चपालयतेतस्माद्राजाचार्यावन
निद्यावनिंद्यौ इतिगौतमीयेएकादशोऽध्यायः॥ ११॥
शूद्रोद्विजातीनभिसंधायाभिहत्यवाग्दंडपारुष्याभ्या
मंगंमोच्योयेनोपहन्यादार्यस्त्र्यभिगमनेलिंगोद्धारःस्वह
रणंचगोप्ताचेद्वधोऽधिकोऽथाहास्यवेदमुपशृण्वतस्त्र
पुजतुभ्यांश्रोत्रप्रतिपूरणमुदाहरणेजिह्वाच्छेदोधारणे
शरीरभेदआसनशयनवाक्पथिषुसमप्रेप्सुर्दंड्यःशतं
क्षत्रियोब्राह्मणाक्रोशेदंडपारुष्येद्विगुणमध्यर्धंवैश्यो
ब्राह्मणस्तुक्षत्रियेपंचाशत्तदर्धंवैश्येनशूद्रेकिंचित्ब्राह्मण
राजन्यवत्क्षत्रियवैश्यावष्टापाद्यंस्तेयकिल्विषंशूद्रस्य ८
द्विगुणोत्तराणीतरेषांप्रतिवर्णंविदुषोऽतिक्रमेदंडभूय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्वंफलहरितधान्यशाकादानेपंचकृष्णलमल्पेपशुपीडि
तेस्वामिदोषः पालसंयुपीडितेस्वामिदोषः पालसंयुक्तेतु
तस्मिन्पथिक्षेत्रेऽनावृतेपालक्षेत्रिकयोःपंचमाषागविष
डुष्ट्रखरेऽश्वमहिष्योर्दशाजाविपुद्वौद्वौसर्वविनाशेश
तद्विष्टाकरणेप्रतिषिद्धसेवायांचनिसंचेलपिंडादूर्ध्वंस्व
हरणंचगोग्मर्थ्येत्रणमेधान्वीरुद्वनस्पतीनांचपुष्पाणि
स्ववेस्मदीतफलानिचापरिवृतानांकुसीदवृद्धिर्धर्म्याविं
शतिःपंचमाषकीमासंनातिसांवत्सरीमेकेचिरस्थाने
द्वैगुण्यंप्रयोगस्यमुक्ताधिंनवर्धतेदित्सतोऽवरुध्यच
चक्रकालवृद्धिःकारिताकापिकाशिखाधिभोगांश्चकु
सीदंपशुपलोमक्षेत्रशतवाह्येषुनातिपंचगुणमजलाभो
गंडधनंदशवर्षभुक्तंपरैस्संनिधौभोक्तुरश्रोत्रियप्रव
जितराजन्यधर्मपुरुषैःपशुभूमिस्त्रीणामनतिभोगारि
क्थभाजिऋणंप्रतिकुर्युःप्रातिभाव्यवणिक्शुल्कमद्य
द्यूतदंडानपुत्रानध्याभवेयुर्निध्यन्वाधियाचितावक्री
तायधोनष्टास्सर्वाननिंदितानपुरुषापराधेनस्तेनःप्र
कीर्णःप्रकीर्णकेशोमुसलीराजानमियात्कर्माचक्षाणः
पूतोवधमोक्षाभ्यामनघ्नन्नेनस्वीराजानशारीरोब्राह्म
णदंडःकर्मवियोगविख्यापनंविवासनांककरणान्यनि
वृत्तौप्रायश्चित्तिस्सचोरसमस्सचिवोमतिपूर्वेप्रतिगृही ९
ताप्यधर्मसंयुक्तेपुरुषशक्त्यापराधानुबंधोविज्ञानादंड

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नियोगोऽनुष्ठानंवावेदवित्समवायवचनाद्वेदवित्समवा
९ यवचनात् इतिगौतमीयेद्वादशोऽध्यायः १२ विप्रति
पत्तौसाक्षिनिमित्तासत्यव्यवस्थाबहवः स्युरनिंदिता
स्वकर्मसुप्रात्ययिकाराज्ञांचनिष्प्रीत्यनभितापाश्चान्य
तरस्मिन्नपिशूद्राब्राह्मणस्त्वब्राह्मणवचनादनुरोध्योऽ
निबंधश्चेन्नासमवेतापृष्टाः प्रब्रूयुरवचनेचदोषिणःस्युः
स्वर्गस्सत्यवचनेविपर्ययेनरकः अनिबद्धैरपिवक्तव्यं
पीडाकृतेनिबंधः प्रमत्तोक्तेचसाक्षिसभ्यराजकर्तृषुदो
षोधर्मतंत्रपीडायांशपथेनैकेसत्यकर्मतद्देवराजब्राह्म
णसंसदिस्यादब्राह्मणानां क्षुद्रपश्वनृतेसाक्षिदशहंति
गोश्वपुरुषभूमिषुदशगुणोत्तरान्सर्वंवाभूमौहरणेनर
कअप्सुमैथुनसंयोगेचपशुवन्मधुसर्पिषोगोवद्वस्त्रहि
रण्यधान्यब्रह्मसुयानेष्वश्ववन्मिथ्यावचनेयाप्योदंड्य
श्चसाक्षीनानृतवचनेदोषोजीवनंचेत्तदधीनंनतुपापी
यसोजीवनंराजाप्राड्विवाकोब्राह्मणोवाशास्त्रवित्प्राड्वि
वाकोमध्योभवेत्संवत्सरंप्रतीक्षेतप्रतिभायांधेन्वनडुह्
स्त्रीप्रजननसंयुक्तेषुशीघ्रमात्ययिकेचसर्वधर्मेभ्योग
रीयः प्राड्विवाकेसत्यवचनंसत्यवचनं इतिगौतमीयेत्र
योदशोऽध्यायः १३ शावमाशौचंदशरात्रमनृत्विग्दी
क्षितब्रह्मचारिणांसपिंडानामेकादशरात्रंक्षत्रियस्यद्वा ९
दशरात्रंवैश्यस्यार्धमासमेकेमासंशूद्रस्यातच्चेदंतःपुन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रापतेतच्छेषेणाशुध्येरनरात्रिशेषेद्वाभ्यांप्रभातेतिसृभि
र्गोब्राह्मणहतानामन्वक्षंराजक्रोधाच्चयुद्धेप्रायोनाशक
शस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतांपिंडनिवृत्ति
स्सप्तमेपंचमेवाननुनेप्येवंमातापित्रोस्तन्मातुर्वागर्भ
माससमारात्रिस्रंसनेगर्भस्यत्र्यहंवाश्रुत्वाचोर्ध्वंदशम्याः
पक्षिणापस्सपिंडेयोनिसंबंधेसहाध्यायिनिचसब्रह्मचारि
ण्येकाहंश्रोत्रियेचोपसंपन्नेप्रेतोपस्पर्शनेदशरात्रमाशौ
चमभिसंधायचेदुक्तंवैश्यशूद्रयोरार्त्तवीर्वापूर्वयोश्चत्र्य
हंवाचार्यतत्पुत्रस्त्रीयाज्यशिष्येषुचैवमवरश्चेद्वर्णःपू
र्ववर्णमुपस्पृशेत्पूर्वोवावरंतत्रशवोक्तमाशौचंपतितचं
डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्टुपस्पर्शनेसचैलो
दकोपस्पर्शनाच्छुध्येच्छवानुगमनेचशुनश्चयदुपहन्या
दित्येकउदकदानंसपिंडैःकृतचूडस्यतत्स्त्रीणांचानति
भोगशाकेऽप्रत्तानामधःशय्यासनिनोब्रह्मचारिणःस
र्वेनमार्जयेरन्नमांसंभक्षयेयुरापदानाप्रथमतृतीयपं
चमसप्तमनवमेषूदकक्रियावाससांचत्यागअंत्येत्वंत्या
नांदंतजन्मादिमातृपितृभ्यांतूष्णीमतावालदेशांतरप्र
व्रजितासपिंडानांसद्यश्शौचराज्ञाचकार्यविरोधाद्ब्राह्म
णस्यचस्वाध्यायानिवृत्त्यर्थंस्वाध्यायानिवृत्त्यर्थं इति १०
गौतमीयेचतुर्दशोध्यायः १४ अथश्राद्धममावास्यायां
पितृभ्योदद्यात्पंचमीप्रभृतिवापरपक्षस्ययथाश्राद्धंसर्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रिभिन्नाद्रव्यदेशब्राह्मणसन्निधानेवाकालनियमश्शक्ति
तः प्रकर्षेद्गुणसंस्कारविधिरन्नस्यनवावरान्भोजयेद
युजोयथोत्साहंवाब्राह्मणान् श्रोत्रियान्वाग्रूपवयश्शी
लसंपन्नान्युवभ्योदानंप्रथममेकेपितृवन्नचतेनमित्र
कर्मकुर्यात्पुत्राभावेसपिंडमातृसपिंडाशिष्याश्चदद्यु
स्तदभावऋत्विगाचार्यौतिलमाषव्रीहियवोदकदानैर्मा
संपितरः प्रीणंतिमत्स्यहरिणरुरुशशकूर्मवराहमेष
मांसैः संवत्सराणिगव्यपयःपायसैर्द्वादशवर्षाणिवा
र्ध्रीणसेनकालशाकच्छागलोहखड्गमांसैर्मधुमिश्रैश्चा
नंत्यंनभोजयेत्स्तेनक्लीबपतितनास्तिकतद्वृत्तिवीरहाग्रे
दिधिषुदिधिषूपतिस्त्रीग्रामयाजकाजपालोत्सृष्टाग्नि
मद्यपकुचरकूटसाक्षिप्रातिर्पस्यचकुंडाशीसोमविक्र
य्यगारदाहीगरदावकीर्णिगणप्रेष्यागम्यागामिहिंस्र
परिवित्तपरिवेत्तृपर्याहितपर्याधात्सक्तात्मदुर्वलाः
कुनखीश्यावदंतः श्वित्रिपौनर्भवकितवाजपराजप्रे
ष्यप्रातिरूपिकीशूद्रापतिनिराकृतिकिलासीकुसीदी
वणिक्शिल्पोपजीविज्यावादित्रतालनृत्तगीतशीला
न्पित्रात्ताकामेनविभक्तान्शिष्यांश्चैकेसगोत्रांश्चभो
जयेदूर्ध्वंत्रिभ्योगुणवंतंसद्यःश्राद्धीशूद्रातल्पगस्तत्पु
रीषेमासंनयतिपितॄंस्तस्मात्तदहर्ब्रह्मचारीस्यात्श्वचं १०
डालपतितावेक्षणेदुष्टंतस्मात्परिश्रितेदद्यात्तिलैर्वाकि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ऽस्मत्किपावनोवाश्मयेसेत्किपावना: षडंगविज्ज्येष्ठसा
मिकस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः पंचाग्निः स्ना
तको मंत्रब्राह्मणविद्धर्मज्ञो ब्रह्मदेयानुसंतान इति हवि
ष्षु चैवं दुर्वलादीन्श्राद्धएवैके श्राद्धएवैके इतिगौत
मीये पंचदशोऽध्यायः १५ श्रावण्यादि वार्षिकं प्रोष्ठ
पदीं वोपाकृत्याधीयीत छंदांस्यर्धपंचमान्मासान्पंच द
क्षिणायनं वा ब्रह्मचार्युत्सृष्टलोमा न मांसं भुंजीत द्वैमा
स्यो वा नियमो नाधीयीत वायौ दिवा पांसुहरे कर्णश्रा
विणि नक्तं वाणभेरीमृदंगगर्जार्तशब्देषु श्वशृगाल
गर्दभसंह्रादे लोहितेंद्रधनुर्नीहारेष्वभ्रदर्शने चाप
र्तौ मूत्रितउच्चारिते निशासंध्योदकेषु वर्षति चैके व
ल्मीकसंतानमाचार्यपरिवेषणे ज्योतिषोर्भानुस्थः श्र
यानः प्रौढपादः श्मशानग्रामांतमहापथाशौचेषु पू
तिगंधातः शवदिवाकीर्तिशूद्रसंनिधाने सुक्तकेचो
द्गारे ऋग्यजुषे च साम्नः शब्दो यावदाकालिका निर्घातभू
मिकंपराहुदर्शनोल्कास्तनयित्नुवर्षविद्युतः प्रादुष्कृ
ताग्निष्वपर्त्तौ विद्युति नक्तं चापररात्रात्त्रिभागादि
प्रवृत्तौ सर्वमुल्काविद्युत्समेसेके पांस्तनयित्नुरपराह्णेऽ
पि प्रदोषे नक्तमर्द्धरात्रादहश्चेत्सज्योतिर्विषयस्थे च रा
ज्ञि प्रेते विप्रोष्य चान्योन्येन सह संकुलोपाहितवेदसमा
प्तिछर्दिश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रममावास्यां

...University Chandigarh. An eGangotri...

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गौ॰ सू॰
११

यां च रात्रौ श्वा कार्तिकी फाल्गुन्याषाढीपौर्णमासी तिस्रोऽष्टका
स्त्रिरात्रमंत्यामेक अभितो वार्षिकं सर्वे वर्षविद्युत्स्तनयि
त्नुसन्निपाते प्रस्यंदिन्यूर्ध्वं भोजनादुत्सवे प्राधीतस्य च नि
शायां चतुर्मुहूर्तं नित्यमेके नगरे मानसमप्यशुचिश्राद्धि
नामाकालिकमकृतान्नश्राद्धिकसंयोगे च प्रतिविद्यं च
यान्स्मरंति स्मरंति इति गौतमीये षोडशोऽध्यायः १६
प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुंजीत प्रतिगृ
ह्णीयाच्चैधोदकयवसमूलफलमध्वभयाभ्युद्यतशय्यास
नयानमयोदधिधानाशफरिप्रियंगुस्रङ्मार्गशाकान्य
प्रणोद्यानि सर्वेषां पितृदेवगुरुभृत्यभरणे चान्यवृत्तिश्चा
न्तरेण शूद्रात्पशुपालक्षेत्रकर्षककुलसंगतकार
यितृपरिचारका भोज्यान्ना वणिक्चाशिल्पी नित्यमभो
ज्यं केशकीटावपन्नं रजस्वलाकृष्णशकुनिपदोपहत
भ्रूणघ्नप्रेक्षितं गवोपघ्रातं भावदुष्टं शुक्तं केवलमदधि
पुनस्सिद्धं पर्युषितमशाकभक्ष्यस्नेहमांसमधून्यु
त्सृष्टपुंश्चल्यभिशस्तानपदेश्यदंडिकतक्षकदर्यबंध
निकचिकित्सकमृगयुवनिषुवार्युच्छिष्टभोजीगण
विद्विषाणामपंक्त्यानां प्राक्दुर्वालाद्वृथान्नाचमनो
त्थानव्यपेतानि समासमाभ्यां विषमसमे पूजातोऽनर्चि
तं च गोश्च क्षीरमनिर्दशायाः सूतके च अजामहिष्योश्च ११
नित्यमाविकमपेयमौष्ट्रमैकशफं च स्यंदिनीयमसूसंधि

University Chandigarh. An eGangotri

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नीनांचमाश्चमपेतवत्साः पंचनखाश्चाशल्यकाः शशश्वा
विड्गोधाखड्गकच्छपाउभयतोदत्केश्यलोमैकशफाकल
विंकप्लवचक्रवाकहंसाः काककंकगृध्रश्येनजलजारक्त
पादतुंडाग्राम्यकुक्कुटसूकरौ धेन्वनड्वाहौ चापन्नदावस
न्नवृथामांसत्यपतानि किसलयक्याकुलशुननिर्यासालो
हिताव्रश्चनाश्चनिचिदारुबकबलाकाशुकमद्गुटिट्टिभ
मांधालनक्तंचराभक्ष्याभक्ष्याः प्रतुदविष्किरजालपादा
मत्स्याश्चाविकृतावध्याश्च धर्मार्थेव्यालहतादृष्टदोषश्च
वाक्प्रशस्तान्यभ्युक्ष्योपयुंजीतोपयुंजीत इति गौतमीये
सप्तदशोऽध्यायः १७ अस्वतंत्राधर्मेस्त्रीनातिचरेद्भर्त्ता
रंवाक्चक्षुः कर्मसंयतापतिरपत्यलिप्सुर्देवराद्गुरुप्र
सूतानर्तुमतीयात्पिंडगोत्रऋषिसंबंधिभ्योयोनिमात्रा
द्वानादेवरादित्येकेनातिद्वितीयंजनयितुरपत्यंसमया
दन्यत्रजीवितश्चक्षेत्रेपरस्मात्तस्यद्वयोर्वारक्षणात्तुभर्त्तु
रेवनष्टेभर्त्तरिषाड्वार्षिकंक्षपणंश्रूयमाणेऽभिगमनंप्र
व्रजितेतुनिवृत्तिप्रसंगात्तस्यद्वादशवर्षाणिब्राह्मणस्य
विद्यासंबंधेभ्रातरिचैवंज्यायसियवीयान्कन्याग्न्युपयमे
षुषडित्येकेत्रीन्कुमार्यृतूनतीत्यस्वयंयुज्येतानिंदितेनो
त्सृज्यपित्र्यानलंकारान्प्रदानंप्रागृतोरप्रयच्छन्दोषीप्रा १२
ग्वाससः प्रतिपत्तेरित्येकेद्रव्यादानंविवाहसिध्यर्थंधर्म
तंत्रसंयोगेचशूद्रादन्यत्रापिशूद्राद्बहुपशोर्हीनकर्म

University Chandigarh. An eGangotri

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णःशतगोरनाहिताग्नेस्सहस्रगोश्वसोमपस्यसप्तमींचाभु
क्त्वानिचयायाप्यहीनकर्मभ्यआचक्षीतराज्ञापृष्टस्तेन
हिभर्त्तव्यःश्रुतशीलसंपन्नश्चेद्धर्मतंत्रपीडायांतस्याक
रणेदोषोदोषः इतिगौतमीयेऽष्टादशोऽध्यायः १८
उक्तोवर्णधर्मश्चाश्रमधर्मश्चाथखल्वयंपुरुषोयाप्येन
कर्मणालिप्यतेऽथैतदयाज्यायाजनमभक्ष्यणमवद्य
वदनंशिष्टस्याक्रियाप्रतिषिद्धसेवनमितिचतत्रप्राय
श्चित्तंकुर्यान्नकुर्यादितिमीमांसंतेनकुर्यादित्याहुर्नहि
कर्मक्षीयतइतिकुर्यादित्यपरंपुनस्स्तवनेनेष्ट्वापुनस्स
वनमायातिविज्ञायतेव्रात्यस्तोमेनेष्ट्वातरतिसर्वंपाप्मा
नंतरतिब्रह्महत्यांयोऽश्वमेधेनयजतेऽग्निष्टुताभिशस्य
मानंयाजयेदितिचतस्यनिष्क्रयणानिजपस्तपोहोमउ
पवासोदानमुपनिषदोवेदांतास्सर्वच्छंदःसुसंहिताम
धून्यघमर्षणमथर्वशिरोरुद्रपुरुषसूक्तंराजनरौहि
णेसामनीबृहद्रथंतरेपुरुषगतिर्महानाम्नीर्महावैराजंम
हादिवाकीर्त्यंज्येष्ठसाम्नामन्यतमद्बहिष्पवमानंकूष्मां
डानिपावमान्यस्सावित्रीचेतिपावनानिपयोव्रतताशाक
भक्षताफलभक्षताप्रसृतयावकोहिरण्यप्राशनंसोम
पानमितिचमेध्यानिसर्वेशिलोच्चयाःसर्वाःस्रवंत्यःपु १२
ण्याहृदास्तीर्थान्यृषिनिवासागोष्ठपरिस्कंदाइतिदेशाः
ब्रह्मचर्यंसत्यवचनंसवनेषूदकोपस्पर्शनमार्द्रवस्त्रता

C-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धःश्लाघितानाशः कइतितपांसि हिरण्यंगौर्वासोश्वो
भूमितिलघृतमन्नमितिदेयानि संवत्सरःषाण्मासा
चत्वारस्त्रयोद्वावेकाश्चतुर्विंशत्यहोद्वादशाहःषडहस्त्र
होऽहोरात्रइतिकालाः एतान्येवानादेशेविकल्पेनक्रि
येरन्नेनःसुगुरुषुगुरूणिलघुषुलघूनि कृच्छ्रातिकृ
च्छ्रौचान्द्रायणमितिसर्वप्रायश्चित्तंसर्वप्रायश्चित्तं इति
गौतमीयेधर्मशास्त्रे ऊनविंशोऽध्यायः १९ अथचतुर्ष्वपिषु
यातनास्थानेषुदुःखान्यनुभूयतत्रेमानिलक्षणानि
भवंतिब्रह्महाद्रैकुष्टीसुरापःश्यावदन्तोगुरुतल्पगः
पंगुंधःस्वर्णहारीकुनखीश्वित्रीवस्त्रापहारीहिरण्य
हारीदर्दुरीतेजोपहारीमंडलीस्नेहापहारीक्षयीतथा
जीर्णवानन्नापहारीज्ञानापहाज्ञानापहारीमूकःप्र
तिहंतागुरोरपस्मारीगोघ्नोजात्यंधःपिशुनःपूतिना
सःपूतिवक्त्रस्तुसूचकःशूद्रोपाध्यायःश्वपाकःगो
त्रपुसीसचामरविक्रयीमद्यपःएकशफविक्रयीमृग
व्याधःकुंडाशीभृतकःशैलिकोवानक्षत्रीवार्धुदीना
स्तिकोरंगोपजीव्यभक्ष्यभक्षीगंडूपदीब्रह्मपुरुषतस्क
राणांदेशिकःषंडवःषंडोमहापथिकोदंडिकश्चाण्डाली
पुल्कसीगोघ्नवकीर्णभिक्षामेधीधर्मपत्नीपुरुषान्येषु
नम्रवर्त्तकःखल्वाटसगोत्रसमयस्त्रभिगामीपितृमा १२
तृभगिनीस्वस्रभिगाम्यावोजिनस्तेषांकुब्जकुंडमंडव्याधि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तन्मंगादरिद्रात्मापुपोत्सवुद्धपश्वं ऽघंऽशेलृषतस्वारप
रपुरुषप्रेष्यपरकर्मकराः क्रमश्चास्याश्चोपपद्यंतेतस्मा
त्कर्तव्यमेवेह प्रायश्चित्तं विशुद्धेर्लक्षणो जीयते धर्मस्य
धारणादिति धर्मस्य धारणादिति इति गौतमीये विंशोऽ
ध्यायः २० त्यजेत्पितरं राजघातकं शूद्रयाजकं शूद्रा
र्थयाजकं वेदविप्लावकं भ्रूणहनं यश्चांत्यावसायिभिस्स
ह संवसेदंत्यावसायिन्यां तस्य विद्यागुरुन्योनिसंबंधां
श्च संनिपात्य सर्वाण्युदकदानानि प्रेतकर्माणि कुर्युः
पात्रं चास्य विपर्यस्येयुर्दासकर्मकरो वावकरादमेध्यपा
त्रमानीय दासीघटात्पूरयित्वा दक्षिणामुखः पदा विप
र्यस्येदमुमनुदकं करोमीति नामग्राहं तं सर्वेन्वालभे
रन्प्राचीनावीतिनो मुक्तशिखाः विद्यागुरवो योनिसंबं
धाश्च वीक्षेरन्नप उपस्पृश्य ग्रामं प्रविशंति अत ऊर्ध्वं ते
न संभाष्य तिष्ठेदेकरात्रं जपन्सावित्रीमज्ञानपूर्वं ज्ञान
पूर्वं चेत्त्रिरात्रं यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन्शुद्धे शा
तकुंभमयं पात्रं पुण्यतमाद्ध्रदात्पूरयित्वा स्रवंतीभ्यो वा
वा तत एनमप उपस्पर्शयेयुः अथास्मै तत्पात्रं दद्युस्त
त्संप्रतिगृह्य जपेच्छांता पृथिवी शांतं शिवमंतरिक्षं यो रो
चनस्तमिह गृह्णामीत्येतैर्यजुर्भिः पावमानीभिस्तरत्स
मंदीभिः कूष्मांडैश्चाज्यं जुहुयात् हिरण्यं ब्राह्मणाय द १३
द्यात् गां वाचार्याय यस्य तु प्राणांतिकं प्रायश्चित्तं स मृतः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शयेनगुरुतल्पगश्शयीतसूर्मिंवाज्वलंतींश्लिष्येल्लिंगंवा
सवृषणमुत्कृत्यांजलावाधायदक्षिणाप्रतीचींव्रजेदजिह्म
माशरीरनिपातान्मृतःशुध्येत्सखिसयोनिसगोत्रशिष्यभा
र्यासुस्नुषायांगविचतल्पसमोवकरइत्येकेश्वभिरादयेद्राजा
निहीनवर्णगमनेस्त्रियंप्रकाशंपुमांसंखादयेद्यथोक्तंवा
गर्दभेनावकीर्णीनिर्ऋतिंचतुष्पथेयजेततस्याजिनमू
र्ध्ववालंपरिधायगलोहितपात्रस्सप्तगृहान्भैक्षंचरेत्क
र्माचक्षाणस्संवत्सरेणशुध्येद्रेतस्कंदनेभयेरोगेस्वप्नेऽग्नी
न्धनभैक्षचरणानिसप्तरात्रंकृत्वाज्यहोमस्समिद्भिर्वारे
तस्याभ्यांसूर्याभ्युदितेब्रह्मचारीतिष्ठेदहरभुंजानोऽभ्यस्त
मितश्चरात्रिंजपन्सावित्रीमशुचिंदृष्ट्वादित्यमीक्षेतप्राणा
यामंकृत्वाभोज्यभोजनेऽमेध्यप्राशनेवानिष्पुरीषीभाव
स्त्रिरात्रावरंभोजनंसप्तरात्रंवास्वयंशीर्णान्युपयुंजानः
फलान्यनतिक्रामन्प्राक्पंचनखेभ्यश्छर्दिनोघृतप्राश
नंचाक्रोशानृतहिंसासुत्रिरात्रंपरमंतपःसत्यवाक्येचे
द्वारुणीमानवीभिर्होमोविवाहमैथुननर्मार्तसंयोगेष्व
दोषमेकेनृतंनतुखलुगुर्वर्थेषुपतःसप्तपुरुषानित
श्चपरतश्चहंतिमनसापिगुरोरनृतंवदन्नल्पेष्वप्यर्थेष्वं
त्यावसायिनीगमनेकृच्छ्राब्दोऽमत्याद्वादशरात्रमुदक्या
गमनेत्रिरात्रस्त्रिरात्रः इतिगौतमीयेचतुर्विंशोऽध्यायः
२४ रहस्यंप्रायश्चित्तमविख्यातदोषस्यचतुर्ऋचंतरत्स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ध्येत्प्राणलाभेवातन्निमित्तेब्राह्मणस्यद्रव्यापचयेवात्र्यव
रंप्रतिराज्ञोऽश्वमेधावभृथेवान्ययज्ञेप्यग्निष्टुदंतश्चेत्स
ष्टश्चेत्ब्राह्मणवधेहत्वापि आत्रेय्यांचैवंगर्भेचाविज्ञाते।
ब्राह्मणस्यराजन्यवधेषड्वार्षिकेप्राकृतंब्रह्मचर्यंऋषभै
कसहस्राश्चगादद्यात्वैश्येत्रैवार्षिकंऋषभैकशताश्चगा
दद्याच्छूद्रेसंवत्सरंऋषभैकदशाश्चगादद्यादनात्रेय्यां
चैवंगांचवैश्यवन्मंडूकनकुलकाकविवदहरमूषिकाश्व
हिंसासुचास्थिमतांसहस्रंहत्वानस्थिमतामनडुद्भारेचा
पिवास्थिन्वतामेकैकस्मिन्किंचित्किंचिद्दद्यात्षंडेचपला
लभारःसीसमाषश्चवराहेघृतघटःसर्पेलोहदंडोब्रह्मब
ध्वांचललनायांजीवोवैशिकेनकिंचित्तल्पान्नधनलाभ
वधेषुपृथग्वर्षाणिद्वेपरदारेत्रीणिश्रोत्रियस्यद्रव्यला
भेचोत्सर्गोयथास्थानंवागमयेत्प्रतिषिद्धमंत्रसंयोगे।
सहस्रवाक्चेदग्न्युत्सादिनिराकृत्युपपातकेषुचैवंस्त्री
चातिचारिणीगुप्तापिंडंतुलभेतमानुषीषुगोवर्जंस्त्रीकृ
तेकूष्मांडैर्घृतहोमोघृतहोमः इतिगौतमीयेत्रयोविंशो
ऽध्यायः २३ सुरापस्यब्राह्मणस्योष्णामासिंचेयुःसुरामा
स्येमृतःशुध्येदमत्यापानेपयोघृतमुदकंवायुंप्रतित्र्यहं
तप्तानिसकृच्छ्रस्ततोस्यसंस्कारोमूत्रपुरीषरेतसांप्राशनेश्व १४
पदुष्ट्रखराणांचांगस्यग्राम्यकुक्कुटसूकरयोश्चगंधाघ्राणे
सुरापस्यप्राणायामाघृतप्राशनंचपूर्वैश्चदष्टस्यतल्पेलो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गौदक्षिणेतिप्रायश्चित्तमविशेषादनार्जवपैशुनप्रति मं
षिद्धाचारानाद्यप्राशनेषुशूद्रायांचरेतस्सिक्त्वायोनौच
दोषवतिकर्मण्यभिसंधिपूर्वेप्यब्लिंगाभिरपउपस्पृ
शेद्वारुणीभिरन्यैर्वापवित्रैःप्रतिषिद्धवाङ्मनसयोर
पचारेव्याहृतयःपंचसर्वास्त्वपोवाचामेदहश्चमादित्य
श्चपुनातुस्वाहेतिप्रातोरात्रिश्चमावरुणश्चपुनात्विती
सायमष्टौवासमिधमादध्याद्देवकृतस्येतिहुत्वैवसर्वस्मा
देनसोमुच्यतेमुच्यते इतिगौतमीयेषड्विंशोऽध्यायः२६
अथातःकृच्छ्रान्व्याख्यास्यामोहविष्यान्प्रातराशान्भु
क्त्वातिस्रोरात्रीर्नाश्नीयादथापरंत्र्यहंनक्तंभुंजीताथा
परंत्र्यहंनकंचनयाचयेदथापरंत्र्यहमुपवसेत्तिष्ठेद
हनिरात्रावासीतक्षिप्रकामस्सत्यंवदेदनार्यैर्नसंभाषे
तरौरवयौधाजयेनित्यंप्रयुंजीतानुसवनमुदकोपस्प
र्शनमापोहिष्ठेतितिसृभिःपवित्रवतीभिर्मार्जयीत
हिरण्यवर्णाःशुचयःपावकाइत्यष्टाभिरथोदकत
र्पणंनमोहमायमोहमायमंहमायधन्वतेतापसायपु
नर्वसवेनमोनमोमौंज्यायोर्म्यायवसुविंदायसर्ववि
दायनमोनमःपारायसुपारायमहापारायपारयि
ष्णवेनमोनमोरुद्रायपशुपतयेमहतेदेवायत्र्यंबका
यैकचरायाधिपतयेहरायेशर्वायेशानायोग्रायवज्रिणे १५
घृणिनेकपर्दिनेनमोनमःसूर्यायादित्यायनमोन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मंत्रीसकृज्जपेदप्रतिग्राह्यंप्रतिजिघृक्षन्प्रतिगृह्य वा भोज्यं
बुभुक्षमाणः पृथिवीमावपेदृत्वंतरारमणउदकोपस्प
र्शनाच्छुद्धिमेके स्त्रीषुपयोव्रतोवदशरात्रंघृतेनद्वितीय
मद्भिस्तृतीयंदिवादिष्वेकभक्तकोजलक्लिन्नवासालोम
निनखानित्वचंमांसंशोणितंस्नाय्वस्थिमज्जानामितिहो
मआत्मनोमुखेमृत्योरास्येजुहोमीत्यंततः सर्वेषांप्राय
श्चित्तंभ्रूणहत्याया अन्यदुक्तान्नियमअग्नेत्वंपारयेतिम
हाव्याहृतिभिर्जुहुयात्कूष्मांडैश्चाज्यंतद्व्रतएववाब्रह्मह
त्यासुरापानस्तेयगुरुतल्पेषुप्राणायामैःस्नातःअघमर्षणंजप
त्समम्अश्वमेधावभृथेनसावित्रींसहस्रकृत्वावर्त्तयन्पुनी
तेहैवात्मानमंतर्जलेवाघमर्षणंत्रिरावर्त्तयन्सर्वेभ्यःपापे
भ्योमुच्यंतेमुच्यंतेमुच्यंते इतिगौतमीयेपंचविंशोऽध्यायः
२५ तदाहुः कतिधावकीर्णीप्रविशतीतिमरुतः प्राणे
नेंद्रंबलेनबृहस्पतिंब्रह्मवर्चसेनाग्निमेवेतरेणसर्वेणे
तिसोमावास्यायांनिश्यग्निमुपसमाधायप्रायश्चित्ता
ज्याहुतीर्जुहोतिकामावकीर्णोस्म्यवकीर्णोस्मिकामका
मायस्वाहाकामाभिदुग्धोस्म्यभिदुग्धोस्मिकामकामाय
स्वाहेतिसमिधमाधायानुपर्युक्ष्ययज्ञवास्तुकृत्वोपोत्थाय
समासिंचतुमेतयात्रिरुपतिष्ठेतत्रयइमेलोकाएषां
लोकानामभिजित्याअभिक्रांत्याइत्येतदेवैकेषांकर्माधि १५
कृतस्यैः एतदेवस्यात्मसंजुहुयादित्यमनुमंत्रयेतव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ष्येत् तस्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्युरेतदे
वान्युदकं सर्वेषूपपातकेषु इति गौतमीये एकविंशोऽध्या
यः २१ ब्रह्महासुरापगुरुतल्पगमातृपितृयोनिसंबंधग
स्तेननास्तिकनिंदितकर्माभ्यासिपतितात्यागिपतितत्या
गिनः पतिताः पातकसंयोजकाश्चैतैश्चाब्दं समाचरन्
ज्ञातिकर्मभ्यो हानिः पतनं परत्र चासिद्धिस्तमेके नरकं
त्रीणि प्रथमान्यनिर्देश्यानि मनुर्न स्त्रीष्वगुरुतल्पगः प
तीत्येके भ्रूणहनि हीनवर्णसेवायां च स्त्री पतति कौटसा
क्ष्यराजगामिपैशुनं गुरोरनृताभिशंसनं पातकसमान्यपं
क्त्यानां प्राग्दुर्बालाद्गोहंतृब्रह्मोज्झतन्मंत्रकृदवकीर्णिप
तितसावित्रिकेषूपपातकमज्ञानाध्यानादत्विगाचार्यौ प
तनीयसेवायां हेयावन्यत्र हानात्पतति तस्य च प्रतिगृह्णीत
त्येके न कर्हिचिन्मातापित्रोरवृत्तिर्दायं तु न भजेरन् ब्राह्मणा
भिशंसने दोषस्तावान् द्विरनेनसि दुर्बलहिंसायां च विमोच
ने शक्तश्चेदभिक्रुद्धावपगुरणं ब्राह्मणस्य वर्षशतमस्वर्ग्यं
निघाते सहस्रं लोहितदर्शने यावतस्तत्प्रस्कंद्य पांसून्सं
गृह्णीयात् इति गौतमीये द्वाविंशोऽध्यायः २२ प्रायश्चि
त्तमग्नौ सक्तिर्ब्रह्मघ्नस्त्रिरवच्छातस्य लक्ष्यं वास्या
ज्जन्ये शस्त्रभृतां खट्वांगकपालपाणिर्वा द्वादश संवत्सरान्ब्र
ह्मचारी भैक्षाय ग्रामं प्रविशेत्कर्माचक्षाणः पथोपक्रामेत्संद
र्शनादार्यस्य स्थानासनाभ्यां विहरन्सवनेषूदकोपस्पर्शी शु

University Chandigarh. An eGangotri

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मोनीलग्रीवायशितिकंठायनमोनमः कृष्णायपिंगला
यनमोनमोज्येष्ठायश्रेष्ठायवृद्धायेंद्रायहरिकेशायोर्ध्व
रेतसेनमोनमः सत्यायपावकायपावकवर्णायका
मायकामरूपिणेनमोनमोदीप्तायदीप्तरूपिणेन
मोनमस्तीक्ष्णायतीक्ष्णरूपिणेनमोनमः सौम्यासुपु
रुषायमहापुरुषायमध्यमपुरुषायोत्तमपुरुषाय
ब्रह्मचारिणेनमोनमश्चंद्रललाटायकृत्तिवाससेनमो
नमइत्येतदेवादित्योपस्थानमेताएवाज्याहुतयोद्वाद
शरात्रस्यांतेचरुंश्रपयित्वैताभ्योदेवताभ्योजुहुयादग्न
येस्वाहासोमायस्वाहाग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्रा
यविश्वेभ्योदेवेभ्योब्रह्मणेप्रजापतयेऽग्नयेस्विष्टकृते
तिततोब्राह्मणतर्पणमेतेनैवातिकृच्छ्रोव्याख्यातोयाव
त्सकृदाददीततावदश्नीयादप्भक्षस्तृतीयः सकृच्छ्रा
तिकृच्छ्रः प्रथमंचरित्वाशुचिः पूतः कर्मण्योभवति
द्वितीयंचरित्वायत्किंचिदन्यंमहापातकेभ्यः पापंकुरु
तेतस्मात्प्रमुच्यतेतृतीयंचरित्वासर्वस्मादेनसोमुच्य
तेऽथैतांस्त्रीन्कृच्छ्रांश्चरित्वासर्वेषुवेदेषुस्नातोभवति
सर्वैर्देवैर्ज्ञातोभवतियश्चैवंवेदयश्चैवंवेद इतिगौत
मीयेषड्विंशोऽध्यायः २६ अथातश्चांद्रायणंतस्यो
क्तोविधिः कृच्छ्रेवपनंव्रतंचेत्श्वोभूतांपौर्णमासीमुपवसे १६
दाप्यायस्वसंतेपयांसिनवोनवइतिचैताभिस्तर्पणमाज्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

होमो हविषश्चानुमंत्रणमुपस्थानं चंद्रमसो यद्देवा देवहे
ळनं चेत समिद्भिराज्यं जुहुयाद्देवकृतस्येति चांते समिद्भिरों
भूर्भुवस्स्वस्तपः सत्यं यशः श्रीरूर्गिडौजस्तेजः पुरुषो धर्मः शि
वः शिरइत्येतैरनुमंत्रणं प्रतिमंत्रं मनसा नमः
स्वाहेति वा सर्वेग्रासप्रमाणमास्याविकारेण चरुभैक्षस
क्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवीं
ष्युत्तरोत्तरं प्रशस्तानि पौर्णमास्यां पंचदश ग्रासान्भुक्त्वैका
पचयेनापरपक्षमश्नीयादमावास्यायामुपोष्यैकोपचयेन
पूर्वपक्षं विपरीतमेकेषामेष चांद्रायणो मासो मासमेतमा
प्त्वा विपापो विपाप्मा सर्वमेनो हंति द्वितीयमाप्त्वा दश पूर्वान्दश
परानात्मानं चैकविंशं पंक्तीश्च पुनाति संवत्सरं चाप्त्वा चंद्र
मसस्सलोकतामाप्नोतीत्याप्नोति इति गौतमीये अष्टाविं
शोऽध्यायः २८ ऊर्ध्वं पितुः पुत्रा रिक्थं भजेरन्निवृत्ते रज
सि मातुर्जीवति चेच्छति सर्वं वा पूर्वजस्येतरान्बिभृयात्पू
र्ववद्विभागेगादद्धर्मवृद्धिर्विंशतिभागो ज्येष्ठस्य मिथुन
मुभयतोदद्युक्तो रथो गोवृषः काणखोरः कूटः षंडो मध्य
मस्यानेकश्चेदविर्धान्यायसी गृहमनोयुक्तं चतुष्पदां चैकै
कं यवीयसस्सम्मं चेतरत्सर्वं द्व्यंशी वा पूर्वजः स्यादेकैकमि
तरेषामेकैकं वा धनरूपं काम्यं पूर्वः पूर्वो लभेत दशतं प
शूनां नैकशफाद्विशफानां वृषभोऽधिको ज्येष्ठस्य वृषभषो
डशा ज्यैष्ठिनेयस्य समं वा ज्यैष्ठिनेयेन यवीयसां प्रतियशोंप

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गो॰ धृ॰

१४

तिमात्रवास्ववर्गेभागविशेषः पितोत्सृजेत्पुत्रिकामनपत्यो
ऽग्निंप्रजापतिंचेष्ट्वास्मदर्थमपत्यमितिसंवादाभिसंधिमा
त्रात्पुत्रिकेत्येकेषांतत्संशयान्नोपयच्छेदभ्रातृकांपिंडगोत्र
ऋषिसंबंधारिक्थंभजेरन्स्त्रीचानपत्यस्यबीजंवालिप्सेतदे
वरवत्यामन्यतोजातमभागंस्त्रीधनंदुहितॄणामप्रत्ताना
मप्रतिष्ठितानांचभगिनीशुल्कंसोदर्याणामूर्ध्वंमातुःपूर्वंचै
केसंसृष्टविभागःप्रेतानांज्येष्ठस्यसंसृष्टिनिप्रेतेऽसंसृष्टीरि
क्थभाक्विभक्तजः पित्र्यमेवस्वयमर्जितंवैद्योऽवैद्येभ्यःका
मंनदद्याद्वैद्याः समंभजेरन्पुत्राऔरसक्षेत्रजदत्तकृत्रिम
गूढोत्पन्नापविद्धारिक्थभाजःकानीनसहोढपौनर्भवपुत्रिका
पुत्रस्वयंदत्तक्रीतागोत्रभाजश्चतुर्थांशभागिनऔरसाद्यभा
वेब्राह्मणस्यराजन्यापुत्रोज्येष्ठोगुणसंपन्नस्तुल्यांशभाक्
ज्येष्ठांशहीनमन्यत्राजन्यावैश्यापुत्रसमवायेसयथाब्राह्म
णीपुत्रेणक्षत्रियाच्चेच्छूद्रापुत्रोऽप्यनपत्यस्यशुश्रूषुश्चेल्ल
भेतवृत्तिमूलमंतेवासिविधिनासवर्णापुत्रोऽप्यन्याय्यवृत्तोन
लभेतैकेषांश्रोत्रियाब्राह्मणस्यानपत्यस्यरिक्थंभजेरन्राजे
तरेषांजडक्लीबौभर्त्तव्यावपत्यंजडस्यभागार्हंशूद्रापुत्रवत्
प्रतिलोमासूदकयोगक्षेमकृतान्नेष्वविभागःस्त्रीषुचसंयुक्ता
स्वानाज्ञातेदशावरैः शिष्टैरूहवद्भिरलुब्धैःप्रशस्तंकार्यंचत्वा १७
रश्चतुर्णांपारगावेदानांप्रागुत्तमात्त्रयआश्रमिणःपृथक्
धर्मविदस्त्रयएतान्दशावरान्परिषदित्याचक्षतेऽसंभवेत्वेते

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णामश्रोत्रियोवेदविच्छिष्टोविप्रतिपत्तौयदाहयतोयम
प्रभवोभूतानांहिंसानुग्रहयोगेषुधर्मिणांविशेषेणस्व
र्गंलोकंधर्मविदाप्नोतिज्ञानाभिनिवेशाभ्यामितिधर्मोध
र्मोधर्मः तृतीयोध्यायः ॥३॥ इतिगौतमधर्मः समाप्तः
॥ २९ ॥ ॥ श्रीगुरुभ्योयेनमोनमः ॥ छ ॥ श ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative



CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

P. U. L.
Form 9.
Manuscript No: 410-Ms.

Form 20.

PANJAB UNIVERSITY LIBRARY

1. Books may be retained for period not exceeding one month by Fellows, Members of the Faculties and Teachers of the University and Colleges, and for not more than two weeks by other classes of members.
2. Books may be renewed on request at the discretion of the Librarian. Th s privilege does not apply to books issued with special permission of the Librarian, as well as periodicals.
3. In case the loan of the book is not renewed, failure to return the book in time will render the borrower to a fine from the date when book was due.
4. Dog earing the pages of a book, marking or writing therein with ink or pencil, tearing or taking out pages, or otherwise damaging it will constitute an injury to a book.
5. **Any such injury to a book is a serious offence. Unless the borrower points out the injury at the time of borrowing the book, he shall be required to replace the book or pay its price.**

Help to keep the book fresh and clean.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

21-7-34
21.7.34

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative